# कुमारस्वामिनम्

## रागम्ः असावेरि    ताळम्ः आदि

### श्री मुत्तुस्वामि दीक्षित विरचिता

पल्लवि

कुमारस्वामिनं गुरुगुहं
नमामि पदसरोरुहमहं श्री

अनुपल्लवि

हिमाद्रिजासुतं सुरपतिनुतं
हिरण्यमणिकुण्डलालङ्कृतम्

मध्यमकाल साहित्यम्

भ्रमात्मकविश्वकरं सुरवरं
भ्रांतिहरचतुरतरं शुभकरम्

चरणम्

कार्तिकेयं बाहुलेयं काञ्चनमयदेहं शिखिवाहं
कार्तस्वरहारं श्रुतिसारं

मध्यमकाल साहित्यम्

गर्वितशूरादिसंहारम्

पूर्तिविद्याप्रदं तत्पदं मूर्तिकरं मूलाज्ञानहरं
कीर्तिशालिनं विनतशूलिनं आर्तिभञ्जनमशेषरञ्जनम्

◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇ ◇